# Vyasakritam Kaveri Stotram

# વ્યાસકૃતં કાવેરીસ્તોત્રમ્

## Document Information

Text title : vyAsakRRitaMkAverIstotram 3

File name : vyAsakRRitaMkAverIstotram3.itx

Category : devii, nadI, devI

Location : doc_devii

Proofread by : Prabha Maruvada

Description-comments : Kaveri Stuti Series No. 532 Thanjavur Sarasvati Mahal Series

Latest update : July 7, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 8, 2024

*sanskritdocuments.org*

Vyasakritam Kaveri Stotram

# વ્યાસકૃતં કાવેરીસ્તોત્રમ્

શ્રીગણેશાય નમઃ ।
માતસ્સહ્યસમુદ્ભવે ભવભયપ્રધ્વંસિનિ ત્વત્તટે-
નિત્યં સંવસતાં સતાં કરગતા કૈવલ્યલક્ષ્મીરિતિ ।
વાદઃ કૈમુતિકસ્તવૈષ સકૃદપ્યાવાતિવીચીમરુ-
ન્નીચૈર્યત્ર ભવન્તિ તત્ર વસતાં સર્વે પુમર્થાર્યતઃ ॥ ૧॥

ભુગ્નઃ પાપભરેણમજ્જતિજડો યઃ કશ્ચન ત્વજ્જલે
સંસારામ્બુનિધેર્નકેવલમસાવુન્મજ્જતિદ્રાગ્સ્ત્વયમ્ ।
કિન્તુ સ્વાનવરાન્ પરાંશ્ચપુરુષાનુત્તારયન્સહ્યજે-
ધન્યઃ કિં બહુના પુનાતિ સકલાન્ દૃગ્ગોચરાનપ્યહો ॥ ૨॥

સ્વલ્પાવગ્રહશુષ્કસસ્ય નિચયા ગ્રીષ્મોષ્મસંશોષિતા
શેષારામસરસ્તટાકનિકરાઃ કે વા નદી માતૃકાઃ ।
ક્લિશ્યન્તે બત ! નેતરે જનપદાશ્ચોલસ્તુ સન્તર્પિતો
નિત્યં સહયસુતે ત્વયાશતભવગ્રાહાંસ્તૃણં મન્યતે ॥ ૩॥

માસં તાપિ કદાપિ ચોલવિષયઃ શ્રીરઙ્ગનાથસ્ફુર-
??તલ્પાનલ્પમુખાનિલેન ગરલજ્જ્વાલાવલી સોષ્મણા ।
ઇત્થં દેવિ દયાવતીવ ભવતી ગ્રીષ્મેઽપિ સંવર્ધતે-
પૂરૈર્દૂરમિતસ્તતો વિસૃમરૈરાપ્યાયન્તી ભુવમ્ ॥ ૪॥

સપ્રાગાત્મભુવઃ કમણ્ડલરથ ત્રૈવિક્રમં તત્પદં-
તાહ્ગ્વ્યોમતટઃ સધૂર્જટિજટાજૂટઃ સગૌરીગુરુઃ ।
સ શ્રીબ્રહ્મગિરિઃ સસહ્યશિખરે ધાત્રીમયઃ શ્રીહરિઃ
સ્થાનાનીતિજયન્તિ દક્ષિણસુરસ્રોતસ્વિનિ ત્વજ્જને ॥ ૫॥

સહ્યે લોકે દિવોન્તે તુહિનશિખરિણીત્યાદિમધ્યાવસાને
ષ્વાસીત્સ્વર્ગાપગા સા વિધિહરિહરસંસર્ગમાસાદ્યધન્યા ।
પાદે સહ્યસ્ય ધાતા તદનુહરિહરાવાદરાવાસમુદ્રા-

દમ્બ!ત્વામાશ્રયન્તૌ પ્રતિપદમખિલાનુગ્રહં તન્વતે તે ॥ ૬॥

સહ્યક્ષોણીધરવરસુતે સર્વતીર્થાવતારં-
પારાવારં સકિલ ભગવાનેકદેશેઽધિશેતે ।
આવિષ્કુર્વસ્ત્વયિ તુ પરમં પ્રેમશેષે શયાનો-
રઙ્ગેશાનો ભગવતિ બહુત્રાન્તરઙ્ગે તવાસ્તે ॥ ૭॥

ભવસ્ય ત્વં દેવિ ત્રિદશસરિતોઽપિ પ્રિયતરા-
વિલોભ્યેનાં વ્યાજાત્ક્વચિદપિજડાજૂટકુહરે ।
યતશ્ચોલોદ્વે(લેદે)શે પ્રતિપદમુપશ્લિષ્ય સતતં
ગિરીશઃ પ્રેમ્ણાનુવ્રજતિ ભવતીમેવ સરસામ્ ॥ ૮॥

વસામ ત્વત્તીરે જનનિ વિધિવત્સન્તતમુપ-
સ્પૃશામ ત્વન્નીરે ચિરમનુસરામ શ્રુતિપથમ્ ।
ભજામ શ્રી સામ્બં સકલકરણૈઃ સહ્યતનયે-
સદાનન્દાદ્વૈતામૃતસરસિ મજ્જામ ચ વયમ્ ॥ ૯॥

તીર્થાન્તરે સહ્યસુતે વસન્તઃ-
કથઞ્ચિદેનઃ ક્ષપયન્તુ સન્તઃ ।
વૃષાસના વા ગરુડાસના વા-
વયં ભવેમ ત્વયિ સંવસન્તઃ ॥ ૧૦॥

બુધો દુણ્ડિર્નામ્ના જગતિ વિદિતો લક્ષ્મણસુધી-
મણેઃ શ્રીમદ્વ્યાસાન્વયજલધિચન્દ્રાદજનિ યઃ ।
પ્રણીતં તેનેદં પઠતુ સુજનઃ સહ્યદુહિતુ-
ર્મહાનદ્યાઃ સ્તોત્રં શુભદમખિલાઘૌઘશમનમ્ ॥ ૧૧॥

ઇતિ શ્રી ઢુણ્ડિરાજવ્યાસવિરચિતં કાવેરીસ્તોત્રં સમ્પૂર્ણમ્ ।
શ્રીરસ્તુ પઠતા ।

Proofread by Prabha Maruvada

*Vyasakritam Kaveri Stotram*

pdf was typeset on July 8, 2024

Please send corrections to *sanskrit@cheerful.com*